६

शुकसप्ततिः

प्रस्तावना

अनिरुद्धवेगा हि गतिः अनङ्गस्य। न सापेक्षते अन्तरायं न वा विरामम्। भूयशोऽवरुद्धमानोऽपि स कामः प्रतिपदं मानिनीं कामिनीं विदधाति। परन्तु पुत्रः विपथि गच्छति चेद् किं पितरौ तं परित्यजति। नैव परन्तु तं बोधयति सन्मार्गे प्रावर्तयति च। एवमेव शुकसप्ततौ मदनविनोदः यदा वाणिज्यार्थं देशान्तरं गतवान् तदा नीत्युपदेशदानद्वारा कामहतायाः प्रभावत्याः चरित्ररक्षणं यथा स्यात् तदर्थं कथाः श्रावितवान्। पञ्चतन्त्रे राज्ञः पुत्राः अलसाः भोगेषु आसक्ताः मूर्खाश्च आसन्। विष्णुशर्मा नामकः विद्वान् कथाद्वारेण तान् प्रबोधितवान् तेन च ते ज्ञानिनः सञ्जाताः। अस्मिन् पाठे तु शुकसप्ततिः इति पुस्तकात् कथाः स्वीकृताः। शुकसप्ततौ शुकः अनैतिककर्मणः प्रभावतीं प्रतिषेद्धुं कथामुखेन नीत्युपदेशान् ददाति स्म।

उद्देश्यानि

इमाः कथाः पठित्वा भवन्तः -

१. कथाच्छलेन नीतिवाक्यकथनम् ज्ञास्यन्ति।

२. संस्कृतवाङ्मये कथाः कथम् आनन्दम् जनयन्ति तद् बोद्धुं शक्नुवन्ति।

३. नैतिकशिक्षां व्यवहारिकशिक्षां च लप्स्यन्ते।

४. संस्कृतेन स्वयं कथाम् लेखितुं शक्नुयुः।

६.१) प्रथमकथा- सुदर्शनधीः

६.१.१) कथामुखम्

हरिदत्तः इत्याख्यस्य कस्यचित् वणिजः मदनविनोदः इति नाम्ना पुत्रः आसीत्। स च पुत्रः दुष्टः आसीत्। कुमार्गगामिनं पुत्रम् एनम् दृष्ट्वा पितरौ दुःखितौ सञ्जातौ। दुःखापन्नम् वणिजम् दृष्ट्वा बन्धुः त्रिविक्रमः इति नाम्ना कश्चित् ब्राह्मणः स्वगृहम् गतवान्। आगत्य च नीतिनिपुणे शुकसारिके आदाय तद्गृहम् पुनः यातवान्। तत्र गत्वा च उक्तवान् मित्र अयम् सपत्नीकः शुकः त्वया पुत्रवत् पालनीयः। अस्य यथायथं पालनेन तव दुःखम् अपगमिष्यति इति। हरदत्तस्तु तम् स्वपुत्राय दुष्टाय समर्पितवान्। मदनविनोदः तम् यथायथम् पालयति स्म। शुकोपदेशेन कालेन कुमार्गगामी दुष्टः पुत्रः मातरि पितरि च

साधुः अभवत् विनीतोऽपि सञ्जातः। अनन्तरम् पितरौ नमस्कृत्य तदाज्ञाम् आदाय पत्नीं च पृष्ट्वा वाणिज्यार्थम् नौकया देशान्तरम् गतवान्। तस्य गमनात् परम् पत्नी प्रभावती शोकव्याकुला कानिचित् दिनानि व्यतीतवती। व्यभिचारिणीभिः तत्सखीभिः इयम् बोधिता यत् पत्युः अनुपस्थितौ परपुरुषगमनम् कार्यम् इति। समुत्सुकायाः अस्याः अपि तद्विषये अभिलाषः सञ्जातः। एवम् यदैव परपुरुषेण रमणार्थम् इयम् गन्तुकामा भवति स्म तदैव शुको वारयति स्म मा गच्छतु इति। चतुरः शुकः कथयति स्म त्वं तादृशम् कुकर्म कर्तुम् अर्हसि परन्तु प्रतिकूलावस्थायाम् आत्मानम् रक्षितुम् तव बुद्धिः अपि आवश्यकी। प्रतिकूलावस्थायाम् दुष्टाः उपहसन्तः एव भवन्ति इत्येवम् श्रुतवत्याः प्रभावत्याः मदनविनोदस्य पत्न्याः औत्सुक्यम् अपगतम्। सः शुकः ताम् परपुरुषसङ्गमात् रक्षितुम् मनोरञ्जकाः नैकाः कथाः उक्तवान्। कथामध्ये अस्याम् विपत्तौ कीदृशम् आचरणम् विधेयम् इत्यादिप्रश्नम् अपि पृच्छति स्म। तासाम् कथानाम् संग्रहः शुकसप्ततिः इति। एवं शुकः तस्याः शीलम् रक्षितवान्। अन्ते मदनविनोदः विदेशात् आगतवान्। ततः स पत्न्या सह सुखेन कालम् व्यतीतवान् इत्येवम् ग्रन्थस्य परिसमाप्तिः।

६.१.२) पूर्वपीठिका

अस्ति चन्द्रपुरं नाम नगरम्। वाणिज्यार्थं सारिकाप्रेषिते मदनविनोदनाम्नि वणिजि तत्पत्नी प्रभावती सम्प्राप्तमधुकाले अनलबाणाहता सती स्वैरिणीभिः सखीभिः प्रतिबोधिता यदा पुरुषान्तराभिलाषिणी सञ्जाता तदा तत् क्षमयितुम् अपि च तस्याः पातिव्रत्यं रक्षितुं शुकः उक्तवान् -

६.१.३) प्रथमकथा- सुदर्शनधीः - मूलपाठः - विभागः - १

शुकः -

गच्छ देवि किमाश्चर्यं यत्र ते रमते मनः।
नृपवद्यदि जानासि परित्राणं त्वमात्मनः॥

प्रभावती पृच्छति- कथमेतत्।

शुकः कथयति- अस्ति विशाला नगरी। तत्र सुदर्शनो राजा। तत्र च विमलो नाम वणिक्। तस्य च पत्नीद्वयं सुभगं रूपसम्पन्नं दृष्ट्वा कुटिलनामा धूर्तस्तद्भार्याद्वयग्रहणेच्छया अम्बिकां देवीमाराध्य विमलरूपं ययाचे। लब्ध्वा च तत्प्रकृतिं विमले बहिर्गते तद्गृहं गत्वा प्रभुत्वं चकार। प्रसाधनदानैर्वशीकृतोऽखिलोऽपि परिजनवर्गः। तद्भार्याद्वयं बहुमानदानादिना सन्तोष्य स्वेच्छया भुङ्क्ते। विमलोऽयं धनाद्यनित्यतां श्रुत्वा दाता बभूवेति परिजनोऽनवरतं चिन्तयति।

व्याख्या

चन्द्रपुरम् इति कश्चित् नगरम् आसीत्। तत्र वाणिज्यार्थं सारिकाप्रेषिते सारिकया प्रेषिते मदनविनोदनाम्नि मदनविनोदः इत्याख्ये वणिजि गते तत्पत्नी मदनविनोदपत्नी सम्प्राप्तमधुकाले अनलबाणहता सती स्वैरिणीभिः व्यभिचारिणीभिः सखीभिः मित्रैः प्रतिबोधिता विज्ञापिता यदा

पुरुषान्तराभिलाषिणी अन्यपुरुषसङ्गतौ अभिलाषवती सञ्जाता अभूत् तदा तत् पुरुषान्तरसङ्गमनेच्छाम् क्षमयितुम् प्रशमयितुम् तस्याः प्रभावत्याः पातिव्रत्यं सतीत्वम् च रक्षितुम् शुकः उक्तवान्-

गच्छ देवि किमाश्चर्यं यत्र ते रमते मनः।
नृपवद्यदि जानासि परित्राणं त्वमात्मनः॥

अन्वयः

देवि यदि त्वम् नृपवत् आत्मनः परित्राणम् जानासि यत्र ते मनः रमते गच्छ। किम् आश्चर्यम्।

अन्वयार्थः

हे देवि (प्रभावति) यदि त्वम् नृपवत् नृपः इव आत्मनः स्वस्य परित्राणम् रक्षां कर्तुम् जानासि तर्हि यत्र यस्मिन् पुरुषे ते तव मनः रमते संलग्नं वर्तते (तत्पार्श्वं) गच्छ। (अस्मिन् विषये)किम् आश्चर्यम्। किमपि आश्चर्यम् नास्ति, यस्याः मनः यत्र रमते सा तत्र यात्येव।

तात्पर्यार्थः

शुकेन प्रभावत्यां वारितायाम् अपि परपुरुषस्य रमणार्थम् गच्छन्तीम् ताम् प्रभावतीम् कथयति शुकः यत् परपुरुषरमणाय गच्छति चेत् तत्र किमपि आश्चर्यम् न भवति यतो हि या यम् इच्छति सा तत्र गच्छति एव तस्मात् हे देवि त्वम् अपि गन्तुम् शक्नोषि किन्तु देवि त्वम् विपदि नृपवद् रक्षणम् कर्तुम् जानासि चेदेव गच्छ अन्यथा कदाचित् महान् क्लेशः उत्पद्येत।

प्रभावती पृच्छति जिज्ञासति कथम् एतत् उक्तम् अर्थात् नृपः कथम् आत्मानम् रक्षितवान् इति प्रश्नः - अस्ति विशाला नगरी। तत्र विशालायाम् नगर्याम् सुदर्शनः इति कश्चित् राजा। तत्र च नगर्याम् विमलः इति कश्चित् वणिक्। तस्य च वणिजः पत्नीद्वयम् सुभगम् सुन्दरम् रूपसम्पन्नम् रूपवत् दृष्ट्वा वीक्ष्य कुटिलनामा कुटिलः इत्याख्यः धूर्तः दुष्टः तद्भार्याद्वयग्रहणेनच्छया तस्य वणिजः भार्याद्वयस्य ग्रहणस्य स्वीकरणस्य इच्छया लिप्सया वणिग्भार्याद्वयस्वीकरणलिप्सया अम्बिकाम् देवीम् आराध्य भगवत्याः अम्बिकायाः आराधनां कृत्वा इत्यर्थः, विमलरूपम् विमलस्य रूपं ययाचे याचितवान् इष्टवान्। लब्ध्वा प्राप्य च तत्प्रकृतिम् तस्य वणिजः प्रकृतिम् आकृतिम् विमले बहिर्गते तद्गृहम् तस्य विमलस्य गृहम् गत्वा प्रभुत्वम् स्वामित्वम् चकार कृतवान्। प्रसादधनदानैर्वशीकृतोऽखिलोऽपि प्रसादेन अनुग्रहेण धनस्य दानैः पुरस्काररूपेण धनं दत्त्वा वशीकृतो स्वायत्तीकृतः अखिलोऽपि सर्वोऽपि परिजनवर्गः भृत्यवर्गः। तद्भार्याद्वयम् तस्य विमलस्य भार्याद्वयम् स्त्रीद्वयम् बहुमानदानादिना अत्यन्तम् सम्मानदानादिना सन्तुष्टं कृत्वा स्वेच्छया यथेष्टम् भुङ्क्ते सम्भोगं करोति। विमलोऽयम् नूतनः अयम् विमलः धनाद्यनित्यताम् धनादेः अनित्यताम् श्रुत्वा मत्वा दाता दानशीलः बभूव अभवत् इति परिजनः भृत्यवर्गः अनवरतम् निरन्तरम् चिन्तयति भावयति।

सरलार्थः

चन्द्रपुरम् इति नगरस्य वणिजि मदनविनोदे वाणिज्यार्थं विदेशं गते तत्पत्नी प्रभावती कामातुरा सञ्जाता। ततः तत्सखीभिः विज्ञापितायाः तस्याः परपुरुषस्य रमणाय इच्छा सञ्जाता। किन्तु शुकः ताम् वारयन् कथयति यत्

यदि सा नृपवद् स्वस्याः रक्षणं कर्तुं शक्नोति, तर्हि सा परपुरुषरमणाय गन्तुम् अर्हति। तदा सा प्रभावती नृपः कथं रक्षणं कृतवान् इति पृष्टवती। तदा शुकः उक्तवान् यत् विशालाख्या एका नगरी आसीत्। तत्रत्यस्य राज्ञः नाम आसीत् सुदर्शनः इति। तत्र निवसति स्म एको वणिक्, यस्य नाम विमलः इति। तस्य भार्याद्वयम् आसीत् - रुक्मिणी सुन्दरी च। तत्रैव नगर्याम् एको धूर्तः आसीत्। तस्य नाम कुटिलः इति। देव्याः अम्बिकायाः आराधनां कृत्वा तस्याः सकाशात् विमलाकृतिं प्राप्तवान्। ततः परं यदा विमलः गृहाद् बहिः प्रस्थितः, तदा स धूर्तः गृहं प्रविष्टवान्। स धनं प्रदाय भृत्यान् स्वाधीने कृतवान्। भार्ये तं स्वपतिरूपेण स्वीकृतवत्यौ। स सर्वेषां धनादिना सन्तोषमपि विहितवान्।

व्याकरणविमर्शः -

- पुरषान्तराभिलाषिणी - पुरुषान्तरस्य पतिभिन्नस्य अभिलाषिणी अभिलाषवती इति षष्ठीतत्पुरुषसमासः।
- प्रसादधनदानैः - प्रसादेन अनुग्रहेण धनस्य दानैः पुरस्काररूपेण धनं दत्त्वा।
- परिजनवर्गः - भृत्यसमुदायः।
- ययाचे - टु याचृ याच्ञायाम् इति धातोः लिटि प्रथमपुरुषैकवचनम्।
- चकार – डुकृञ् करणे इति धातोः लिटि प्रथमपुरुषैकवचने रूपम्।

६.१.४) प्रथमकथा- सुदर्शनधीः - मूलपाठः - विभागः - २

अथ सत्यविमलोऽपि द्वारमागतः कुटिलाज्ञया द्वारपालेन निषिद्धः। ततो बहिस्थः फूत्करोति "वञ्चितोऽहं धूर्तराजेन"। तस्य चैवं क्रन्दतो गोत्रजा जनाः कौतुकाच्च मिलिताः। तत्क्षणात् हट्टानि मुक्त्वा वणिक्सार्थो मिलित्वा आरक्षकमन्त्रिमुख्यानां पुरतः फूच्चक्रे। "राजन् वञ्चितोऽस्मि धूर्तराजेन"। ततो राजा तदवलोकनाय प्रहिताः पुरुषाः। तेनापि ते द्रव्यादिदानेन सानुकूलाः कृताः। तं धनमायकं गृहे दृष्ट्वा जनो वदति- "स्वामिन् विमलो गृहे विद्यते। अयञ्च धूर्तराट् द्वारस्थः"। ततो नृपेण द्वावप्येकत्र कृतौ। ततो द्वयोर्मध्यान्न कोऽपि धूर्ततरयोर्व्यक्तिं जानाति। जातः कोलाहलोऽखिललोकव्यवहार-नाशकरो राज्ञश्चापवादः। यतो राज्ञां दुष्टनिग्रहः शिष्टपालनञ्च स्वर्गाय।

व्याख्या

अथ अनन्तरम् सत्यविमलः अपि अर्थात् वस्तुतः यः विमलः अस्ति सोऽपि द्वारम् गृहद्वारम् आगतः कुटिलाज्ञया कुटिलस्य आज्ञया आदेशेन द्वारपालेन द्वाररक्षकेण निषिद्धः प्रतिषिद्धः। ततः अनन्तरम् बहिस्थः फूत्करोति चित्करोति वञ्चितः अहम् धूर्तराजेन कुटिलेन। तस्य च एवं क्रन्दतः क्रन्दनं कुर्वाणस्य गोत्रजाः जनाः कौतुकात् उत्कण्ठया मिलिताः। तत्क्षणात् तस्मिन् काले हट्टानि मुक्त्वा त्यक्त्वा वणिक्सार्थः वणिक्समूहः मिलित्वा आरक्षिकमन्त्रिमुख्यानाम् आरक्षिकाणाम् नगरपालानाम् मन्त्रिमुख्यानाम् मन्त्रिप्रवराणाम् च पुरतः पुरस्तात् फूच्चक्रे चित्कारम् कृतवान् - राजन् वञ्चितः अहम् धूर्तराजेन कुटिलेन।

ततः अनन्तरम् राज्ञा तदवलोकनाय प्रहिताः प्रेषिताः पुरुषाः। तेनापि धूर्तराजेन कुटिलेन ते राजपुरुषाः द्रव्यादिदानेन सानुकूलाः कृताः स्वायत्तीकृताः। तं धनदायकम् गृहे दृष्ट्वा जनः राजपुरुषः वदति - स्वामिन् विमलः तु गृहे विद्यते अस्ति। अयं च धूर्तराट् धूर्तराजः द्वारस्थः द्वारे स्थितः। अर्थात् द्वारे स्थितः वास्तविकः विमलः धूर्तराजः किञ्च गृहे स्थितः नूतनः विमलः एव साधुः इति राजपुरुषः राजानम् वदति इति भावः। (वस्तुतः तथा नास्ति, अत्र वैपरीत्यमेव अस्ति)।

ततः नृपेण राज्ञा द्वावप्येकत्र द्वौ अपि एकत्र कृतौ। ततः द्वयोः मध्ये न कोऽपि धूर्तेतरयोर्व्यक्तिं जानाति अर्थात् कः धूर्तः विमलः को वा वास्तविकः विमलः इति न जानाति। जातः कोलाहलः अखिललोकव्यवहारनाशकरः समग्रलोकव्यवहारनाशकरः राज्ञः नृपस्य च अवपादः लोकनिन्दा। यतः यस्मात् राज्ञाम् नृपाणाम् दुष्टनिग्रहः दुष्टस्य निग्रहः दमनम् शिष्टपालनम् शिष्टस्य पालनम् च स्वर्गाय। अर्थात् शिष्टपरिपालनेन दुष्टदमनेन च राज्ञः स्वर्गलाभो भवति इति भावः।

सरलार्थः

परं यदा सत्यः विमलः आगतः तदा सर्वे तं वञ्चकरूपेण स्वीकृतवान्। स सत्यः विमलः गोत्रजान् आदाय राज्ञः सकाशं गतवान् सुविचाराय। तदा राजा राजपुरुषं प्रेषितवान् वृत्तान्तं ज्ञातुं परन्तु सः अपि धूर्तेन धनेन मोहितः। राजानम् च मिथ्या उक्तवान् सत्यः विमलः धूर्तः इति। तदा राजा उभौ अपि आहूतवान्। परन्तु उभयोः समाना आकृतिः अस्ति इति हेतोः किम् सत्यम् इति राजा ज्ञातुम् न शक्तवान्। एवं क्रमेण लोकव्यवहारनाशकः कोलाहलः संवृत्तः। राज्ञः च सर्वत्रैव निन्दा श्रूयते स्म। यतो हि राज्ञः कारणम् दुष्टदमनम् शिष्टपरिपालनम् च। तथा क्रियते चेत् राज्ञः स्वर्गलाभो भवति।

व्याकरणविमर्शः

- फूत्करोति - चीत्कारं करोति।
- गोत्रजाः - समाने गोत्रे जायन्ते इति गोत्रजाः कुलोत्पन्नाः।
- वणिक्सार्थः - वणिजां सार्थः समुदायः वणिक्सार्थः।
- आरक्षिकमन्त्रिमुख्यानाम् - आरक्षिकाः नगरपालाः मन्त्रिमुख्याः मन्त्रिवराश्च तेषाम्।
- धूर्तेतरयोः - धूर्तश्च इतरश्च धूर्तेतरौ इति इतरेतरयोगद्वन्द्वसमासः, तयोः धूर्तेतरयोः।
- अखिललोकव्यवहारनाशकरः - नाशं करोति इति नाशकरः। लोकस्य व्यवहारः इति लोकव्यवहारः इति षष्ठीतत्पुरुषः, अखिलः (सर्वः) च असौ लोकव्यवहारः चेति अखिललोकव्यवहारः तस्य नाशकरः इति षष्ठीतत्पुरुषे अखिललोकव्यवहारनाशकरः इति।
- दुष्टदमनम् - दुष्टस्य दमनम् दुष्टदमनम् इति षष्ठीतत्पुरुषसमासः।
- शिष्टपालनम् - शिष्टस्य पालनम् शिष्टपालनम् इति षष्ठीतत्पुरषसमासः।

६.१.५) प्रथमकथा- सुदर्शनधीः - मूलपाठः - विभागः - ३

उक्तञ्च-

प्रजापीडनसन्तापात्समुद्भूतो हुताशनः।

राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्त्तते॥ इति।

ततो राजा एकान्ते तयोर्निर्णयमचिन्तयत्। तत्कथय कथं निश्चयः स्यादिति प्रश्नः।

व्याख्या

परं राजा स्वयम् अस्य समाधाने प्रवृत्तः। कथितम् अपि -

प्रजापीडनसन्तापात्समुद्भूतो हुताशनः।
राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्त्तते॥ इति।

अन्वयः

प्रजापीडनसन्तापात् समुद्भूतः हुताशनः राज्ञः कुलम् श्रियम् प्राणान् अदग्ध्वा विनिवर्तते।

अन्वयार्थः

प्रजापीडनसन्तापात् प्रजानाम् पीडनम् तद्रूपसन्तापः उष्णता तस्मात् समुद्भूतः उत्पन्नः हुताशनः अग्निः राज्ञः नृपस्य कुलम् वंशम् श्रियम् सम्पदम् प्राणान् अदग्ध्वा न विनिवर्तते दग्ध्वैव विनिवृत्तो भवति शान्तो भवति।

सरलार्थः

श्लोकस्य अयम् भावः - राज्ञः प्रजानां यदि पीडनं भवति तर्हि तेन प्रजाः क्रुद्धाः भवन्ति। तेन क्रोधाग्निना नृपस्य कुलं धनम् तथा स्वप्राणाः अपि नश्यन्ति इति।

ततः राजा एकान्ते तयोः विमलयोः निर्णयम् अचिन्तयत् चिन्तितवान्। तत् कथय वद कथं निश्चयः स्यात् इति प्रश्नः।

व्याकरणविमर्शः

- प्रजापीडनसन्तापात् - प्रजानाम् पीडनम् तद्रूपसन्तापः उष्णता तस्मात्।

६.१.६) प्रथमकथा- सुदर्शनधीः - मूलपाठः - विभागः - ४

शुकः- स राजा लब्धोपायस्तद्विमलभार्याद्वयं पृथक्पृथक्संस्थाप्य पृष्टवान्- किं युवयोः पाणिग्रहणे भर्त्रा विभूषणं प्रदत्तं धनञ्च। पश्चात्किं जल्पितं प्रथमसङ्गे च का वार्त्ता भर्त्रा सहाभूत्। का माता कश्च पिता। किं कुलम्, का जातिः। इत्येवं पृष्टाभ्यां यथालब्धं यथावृत्तं यथाप्रोक्तं यथासुप्तं सर्वं ताभ्यां कथितम्। पश्चात्तु तौ पुरुषौ पृष्टौ परस्परं विसंवदन्तौ। ततो भार्याद्वयस्य रुक्मिणीसुन्दरीनामधेयस्य यः संवादं वदति स सत्यः। इतरस्तु धूर्तो राज्ञा निर्वासितः। सत्यस्तु राज्ञा सभार्यः संस्कृतः स्वगृहं गतः। इति महाराजबुद्धिः॥

व्याख्या

शुकः वदति - स राजा लब्धोपायः प्राप्तोपायः तद्वविमलभार्याद्वयम् तस्य विमलस्य भार्याद्वयम् पृथक् पृथक् संस्थाप्य पृष्टवान् - किं युवयोः पाणिग्रहणे भर्त्रा विभूषणम् प्रदत्तम् धनं च। पश्चात् ततः परम् किम् जल्पितम् कथितम् प्रथमप्रसङ्गे प्रथमे सङ्गमकाले च का वार्ता कथा भर्त्रा पत्या सह अभूत्। का माता कश्च पिता। किम् कुलम् वंशः। का जातिः। इत्येवं पृष्टाभ्याम् ताभ्याम् यथालब्धम् यथा प्राप्तम्

तथा, यथावृत्तम् यथा घटितम् तथा, यथाप्रोक्तम् यथा कथितम् तथा, यथासुप्तम् यथा सुप्तम् शयितम् तथा तत् सर्वम् ताभ्याम् कथितम् उक्तम्। पश्चात् तौ पुरुषौ परस्परम् विसंवदन्तौ विवादं कुर्वन्तौ पृष्टौ राज्ञा इति शेषः। ततः अनन्तरम् भार्याद्वयस्य रुक्मिणीसुन्दरीनामधेयस्य अर्थात् द्वयोः भार्ययोः मध्ये यः यस्याः कस्याश्चित् संवादं वदति यथायथम् इति शेषः, सः सत्यः साधुः। इतरस्तु धूर्तः विमलः राज्ञा निर्वासितः बहिष्कृतः। सत्यस्तु विमलः राज्ञा सभार्यः भार्यासहितः संस्कृतः स्वगृहम् गतः।

सरलार्थः

सः किं कृतवान् इति पृष्टे शुकः उत्तरति - तदा राजा तस्य पत्नीद्वयं पृथक् पृथक् स्थापयित्वा पृष्टवान् यत् तयोः विवाहसमये पतिः किम् भूषणं प्रदत्तवान्, विवाहात् परं प्रथमदिवसे कथं वार्तालापः अभवत्। मातुः पितुश्च नाम किम्, कुलस्य जातेर्वा किं नाम इत्यादिकम्। ततः परं राजा तं पुरुषद्वयं पृष्टवान्। भार्ययोः यानि उत्तराणि आसन् तानि यः उक्तवान् स एव सत्यः विमलः इति निश्चयो जातः। उत्तरम् दातुम् यः अशक्तः सः धूर्तः विमलः। अनन्तरम् सत्यः विमलः भार्याभ्यां सह राज्ञा सत्कृतः स्वगृहं यातः। धूर्तं च विमलम् राजा निर्वासितवान्।

व्याकरणविमर्शः

- लब्धोपायः - लब्धः प्राप्तः उपायः येन सः।
- महाराजबुद्धिः - महान् चासौ राजा चेति महाराजः इति कर्मधारयसमासः, महाराजस्य बुद्धिः इति महाराजबुद्धिः इति षष्ठीतत्पुरुषसमासः।

पाठगतप्रश्नाः-१

१. अनङ्गस्य गतिः कीदृशी।

२. शुकः कां प्रति कथाम् उक्तवान्।

३. नगर्याः नाम किम्।

४. विशालनगर्याः नृपस्य किं नाम।

५. वणिजः नाम किम्।

६. वणिजः भार्ययोः नाम किम्।

७. धूर्तस्य नाम किम्।

८. धूर्तः कां देवतां पूजयित्वा वरं प्राप्तवान्।

९. कीदृशः अग्निः राज्ञः कुलं दहति।

१०. राज्ञः दुष्टनिग्रहः शिष्टपालनं च किं निमित्तकम्।

११. सुदर्शननामकराज्ञ राजधानी............।

१२. विमलस्य पत्नीद्वयं........... .... च।

१३. .... नामकः धूर्तः अम्बिकां देवीम् आराध्य विमलरूपं ययाचे।

१४. धूर्तः भार्याद्वयं केन प्रकारेण सन्तोषितवान्।

१) भयेन

२) प्रेम्णा

३) बहुमानदानादिना

४) क्रूरस्वरेण

१५. .... समुद्भूतः हुताशनः राज्ञः कुलं दग्ध्वा विनिवर्तते।

१६. राज्ञः शिष्टपालनं किमर्थम्।

१) प्रजानां प्रभुत्वप्राप्त्यर्थम्

२) शत्रुषु वीरत्वदर्शनार्थम्

३) स्वर्गप्राप्त्यर्थम्

४) भोगवस्तुलाभार्थम्

६.२) द्वितीयकथा- विषाङ्गनावृत्तम्

भूमिका

जगति नैके गुरुजनानाम् उपदेशं न शृण्वन्ति। ते स्वकीयम् मतम् अवलम्ब्य परमतम् अनादृत्य च स्वजीवनम् निर्वहन्ति। तेन तेषां महती दुर्गतिः भवति। शुकसप्ततौ एकस्याम् कथायाम् ब्राह्मणः गुरूणाम् आज्ञाम् उल्लङ्घ्य विषकन्यया साकं विवाहं कृतवान्। तेन तस्य महत् दुःखम् जातम्। सेयम् कथा अत्र प्रस्तूयते।

६.२.१) द्वितीयकथा- विषाङ्गनावृत्तम् - मूलपाठः - विभागः - १

शुकः- मां कृतावज्ञं कृत्वा मा गच्छ। यतो बालकादपि हितं वाक्यं ग्राह्यम्।

कृतावज्ञः पुरा देवि वृद्धवाक्यपराङ्मुखः।
पतितो ब्राह्मणोऽनर्थे विषकन्याविवाहने॥ १॥

प्रभावती पृच्छति- कथमेतत्।

शुकः- अस्ति सोमप्रभं नाम द्विजस्थानम्। तत्र विद्वान्धार्मिकः सोमशर्मा नाम विप्रः। तत्पुत्री रूपौदार्यगुणोपेता विषकन्येति विज्ञाताभूत्। तेन तां भयेन कोऽपि न विवाहयति। ततः सोमशर्मा वरार्थं भुवं पर्यटन् सम्प्राप्तो द्विजस्थानं जनस्थानं नाम। तत्र गोविन्दनामा ब्राह्मणो जडो निर्धनश्च। तस्मै कन्या प्रदत्ता। तेन सुहृदां निवारयतामपि कृतावज्ञेनोढ। सर्वरूपलावण्यगुणोपेता मोहिनी विषकन्या। सा विदग्धा गोविन्दस्तु मूर्खो लघुवयाश्च। ततश्च सा आत्मनो रूपलावण्ययौवनं शुशोच।

अविदग्धः पतिः स्त्रीणां प्रौढानां नायकोऽगुणी।

गुणिनां त्यागिनां स्तोको विभवश्चेति दुःखकृत्॥२॥
प्रावृट्समयप्रवासो यौवनदिवसे तथा च दारिद्र्यम्।
प्रथमस्नेहवियोगस्त्रीण्यपि गुरुकाणि दुःखानि॥३॥
अप्रस्तावे पठितं कण्ठविहीनञ्च गायनं गीतम्।
मा मा भणन्त्यां सुरतं त्रीण्यपि गुरुकाणि दुःखानि॥४॥

व्याख्या

शुकः कथयति - माम् कृतावज्ञं कृततिरस्कारम् कृत्वा मा गच्छ। यतः कारणं हि बालकात् लघोः अपि बालात् कदाचित् हितम् उपकारकम् वाक्यम् वचः ग्राह्यम् स्वीकार्यम्।

कृतावज्ञः पुरा देवि वृद्धवाक्यपराङ्मुखः।
पतितो ब्राह्मणोऽनर्थे विषकन्याविवाहने॥ १॥

अन्वयः

देवि पुरा ब्राह्मणः विषकन्याविवाहने वृद्धवाक्यपराङ्मुखः कृतावज्ञः अनर्थे पतितः(१)॥

अन्वयार्थः

हे देवि पुरा प्राचीनकाले ब्राह्मणः विषकन्याविवाहप्रसङ्गे वृद्धानां वाक्ये पराङ्मुखः तेषां कथनं न श्रुत्वा, न कृत्वा अवज्ञा येन सः कृतावज्ञः वृद्धानाम् अवज्ञां कृत्वा (विषकन्यां परिणीय) अनर्थे घोरसङ्कटे पतितः(१)॥

तात्पर्यार्थः

देवि श्रूयताम् पुराकाले विषकन्यायाः विवाहप्रसङ्गे ज्येष्ठानाम् वाक्यम् अश्रुत्वा तेषाम् अवज्ञाम् कृत्वा च ब्राह्मणः महति सङ्कटे पतितः(१)॥

व्याख्या

प्रभावती पृच्छति कथम् एतत् संवृत्तम् इति

शुकः कथयति - अस्ति सोमप्रभम् नाम द्विजस्थानम् ब्राह्मणस्थानम्। तत्र सोमप्रभाख्ये स्थाने विद्वान् ज्ञानी धार्मिकः सोमशर्मा नाम विप्रः ब्राह्मणः। तत्पुत्री तस्य पुत्री रूपौदार्यगुणोपेता रूपवती उदारा च विषकन्या इति विज्ञाता अभूत् अभवत्। तेन तस्मात् ताम् विषकन्याम् भयेन कोऽपि न विवाहयति। ततः सोमशर्मा वरार्थम् भुवम् पृथिवीम् पर्यटन् भ्रमन् सम्प्राप्तः समागतः द्विजस्थानम् जनस्थानम् नाम। अर्थात् जनस्थानाख्यः ग्रामः प्राप्तः। तत्र गोविन्दनामा ब्राह्मणः जडः निर्धनः धनशून्यः। तस्मै कन्या प्रदत्ता समर्पिता। तेन गोविन्देन सुहृदाम् मित्राणाम् निवारयताम् वारणम् कुर्वताम् कृतावज्ञेन कृततिरस्कारेण ऊढा विवाहिता सर्वरूपलावण्यगुणोपेता सर्वरूपलावण्यगुणयुक्ता मोहिनी विषकन्या। सा विदग्धा कामकलाप्रवीणा, गोविन्दस्तु मूर्खः लघुवयाः अल्पवयस्कः च। ततः च सा आत्मनः स्वस्य रूपलावण्ययौवनम् रूपम् च लावण्यम् च यौवनम् च शुशोच शोकम् कृतवती -

अविदग्धः पतिः स्त्रीणां प्रौढानां नायकोऽगुणी।

गुणिनां त्यागिनां स्तोको विभवश्चेति दुःखकृत्॥२॥

अन्वयः

स्त्रीणाम् पतिः अविदग्धः प्रौढानाम् नायकः अगुणी। त्यागिनाम् गुणिनाम् स्तोकः विभवः च इति दुःखकृत् (२)॥

अन्वयार्थः

स्त्रीणां कामकलानिपुणानां विदग्धानाम् पतिः अविदग्धः मूर्खः कामकलानभिज्ञः प्रौढानाम् कामकलाभ्यासे पूर्णतां गतानाम् स्त्रीणां नायकः अगुणी मूर्खः। त्यागिनां दानशीलानां गुणिनां स्तोकः अल्पः विभवः, इति दुःखं करोतीति दुःखकृत् (२)॥

तात्पर्यार्थः

कामकलादिषु निपुणानाम् स्त्रीणाम् मूर्खः पतिः, कामकलाभ्यासे प्रौढानाम् स्त्रीणाम् मूर्खः नायकः, दानशीलानाम् गुणिजनानाम् अल्पम् धनम् इति त्रयम् दुःखम् ददाति।

(२)॥

प्रावृट्समयप्रवासो यौवनदिवसे तथा च दारिद्र्यम्।
प्रथमस्नेहवियोगस्त्रीण्यपि गुरुकाणि दुःखानि॥३॥

अन्वयः

प्रावृट्समयप्रवासः यौवनदिवसे दारिद्र्यम्, तथा च प्रथमस्नेनहवियोगः इति त्रीण्यपि गुरुकाणि दुःखानि।(३)॥

अन्वयार्थः

प्रावृट्समयप्रवासः वर्षासु प्रवासः परदेशगमनं प्रियावियोगः यौवनदिवसे यौवनकाले दारिद्र्यम् धनाभावः येन भोगविलाससामग्री नोपलभ्यते, प्रथमस्नेहे एव प्रियवियोगः इति त्रीण्यपि महद् दुःखं कुर्वन्ति (३)॥

तात्पर्यार्थः

वर्षाकाले विदेशगमनम् , यौवने धनाभावः, प्रथमस्नेहे एव प्रियायाः वियोगः इति त्रयम् अत्यन्तम् दुःखम् करोति। (३)॥

अप्रस्तावे पठितं कण्ठविहीनञ्च गायनं गीतम्।
मा मा भणन्त्यां सुरतं त्रीण्यपि गुरुकाणि दुःखानि॥४॥

अन्वयः

अप्रस्तावे पठितम् कण्ठविहीनं गीतं गायनम् मा मा इति भणन्त्याम् सुरतम् इति त्रीण्यपि गुरुकाणि दुःखानि। (४)॥

अन्वयार्थः

अप्रस्तावे अनवसरे काव्यपठनम्, कण्ठविहीनं स्वरमाधुर्यरहितं गीतं गायनम्, मा मा इति निषेधं कुर्वन्त्यां नायिकायां सुरतम् इति त्रीण्यपि गुरुकाणि महान्ति दुःखानि (४)॥

तात्पर्यार्थः

अनवसरे काव्यपठनम्, स्वरमाधुर्यरहितम् गीतगायनम्, मा मा इति निषेधं कुर्वन्त्याः नायिकाः सम्भोगः इति त्रयमपि महद् दुःखम् करोति।(४)॥

सरलार्थः

अत्र आदौ शुकः वदति यत् कस्यापि अवज्ञा न करणीया। बालकः यदि हितवाक्यं वदति, तर्हि तस्यापि वाक्यं कदाचित् स्वीकार्यम् भवति। तत्र कथामुखेन तमेव आशयम् वक्तुम् आरब्धवान्। शुकः उक्तवान् यत् पुरा सोमप्रभम् इत्याख्यद्विजस्थानम् आसीत्। तत्र कश्चन विप्रः आसीत्। तस्य नाम आसीत् सोमशर्मा इति। तस्य कन्या रूपलावण्यवती आसीत्। सा विषकन्या इत्यभिधया विख्याता जाता। तस्माद् कोऽपि तां परिणेतुं न इच्छति स्म। सः सोमशर्मा बहुत्र अन्वेषणं कृत्वा जनस्थाननामकं द्विजस्थानं प्राप्तवान्। तत्र कश्चन मूर्खः निर्धनश्च ब्राह्मणः आसीत्। तस्य नाम आसीत् गोविन्दः इति। तस्य सर्वे बान्धवाः विवाहाय अनुमतिं न दत्तवन्तः, परन्तु तस्याः रूपेण मोहितः सन् स गोविन्दः तां परिणीतवान्। सा मोहिनीनाम्नी विषकन्या रूपसम्पन्ना कामकलायां निपुणा आसीत्, गोविन्दस्तु मूर्खः वयसापि कनिष्ठः आसीत्। तस्माद् तस्याः दुःखम् अभवत्। इदं प्रसिद्धं यत् - कस्यापि मूर्खस्य पत्नी यदि कामकलायां निपुणा भवति तदा तस्याः दुःखम् भवति। पुनः यदि कापि नायिका रूपगुणसम्पन्ना गुणवती च स्यात् तदा नायकः यदि गुणहीनः स्यात् तर्हि तस्य महद् दुःखं भवेत्। किञ्च यदि कस्यापि दानशीलस्य समीपे धनम् अल्पम् भवति चेत् तस्य दानशीलत्वं तस्मै दुःखं ददाति इति। यदा काव्यपठनस्य समयः न भवति तदा काव्यपठनम्, पुनः स्वरमाधुर्यादिकं विना एव गीतगायनम्, अपि च सम्भोगं कर्तुम् या नारी नेच्छति तया साकं सम्भोगः इति भाविदुःखदायकम् भवति।

व्याकरणविमर्शः

- कृतावज्ञम् - कृता अवज्ञा तिरस्कारः यस्य तम्। मां कृतावज्ञं कृत्वा मम वचनं तिरस्कृत्य।
- द्विजस्थानम् - द्विजस्य ब्राह्मणस्य स्थानम् इति षष्ठीतत्पुरुषसमासः।
- रूपौदार्यगुणोपेता - रूपेण औदार्यादिगुणैश्च उपेता युक्ता।
- विज्ञाता - विख्याता
- विदग्धा - कामकलानिपुणा।
- निर्धनः - नास्ति धनम् यस्य सः निर्धनः इति बहुव्रीहिसमासः।
- कृतावज्ञेन – कृता अवज्ञा येन सः कृतावज्ञः कृततिरस्कारः इति बहुव्रीहिसमासः।
- सर्वरूपलावण्यगुणोपेता - सर्वरूपञ्च लावण्यगुणश्च सर्वरूपलावण्यगुणौ ताभ्याम् उपेता युक्ता इति सर्वरूपलावण्यगुणोपेता।

६.२.२) द्वितीयकथा- विषाङ्गनावृत्तम् - मूलपाठः - विभागः - २

सान्यदा गोविन्दं पतिमित्यब्रवीत्- "मम पितुर्गेहात्समागताया बहूनि दिनानि सञ्जातानि। ततोऽहं त्वयैव सह गमिष्ये नान्यथा।" ततः शकटं मार्गयित्वा सभार्यकः स चलितः। यावत्प्रयाति तावत्पथि एको युवा वाग्मी सुरूपः शूरश्च विष्णुनामा ब्राह्मणो मिलितः। तस्य ब्राह्मणस्य तस्याश्चान्योन्यमनुरागः सञ्जातः। उक्तञ्च-

प्रीतिः स्याद्दर्शनाद्यैः प्रथममथ मनःसङ्गसङ्कल्पभावो।
निद्राछेदस्तनूत्वं वपुषि कलुषता चेन्द्रियाणां निवृत्तिः॥
ह्रीनाशोन्मादमूर्च्छामरणमिति जगद्यात्यवस्था दशैताः।
लग्नैर्यत्पुष्पबाणैः स जयति मदनः सन्निरस्तान्यधन्वी॥५॥

व्याख्या

सा अन्यदा अन्यस्मिन् दिवसे गोविन्दम् पतिम् भर्तारम् अब्रवीत् उक्तवती - मम पितुः गेहात् गृहात् समागतयाः आगतायाः बहूनि अनेकानि दिनानि सञ्जातानि। ततः अहम् त्वया एव सह गमिष्ये नान्यथा। गच्छामि चेत् त्वया (गोविन्देन) सहैव अन्यथा न गमिष्यामि इति भावः।

ततः शकटं बैलगाडी इति वाहनविशेषम् मार्गयित्वा अन्वेष्य सभार्यकः भार्यया सह स चलितः गतः। यावत् प्रयाति गच्छति तावत् पथि मार्गे कश्चन युवा युवकः वाग्मी सुवक्ता रूपवान् बलवान् च विष्णुः इत्याख्यः ब्राह्मणः मिलितः प्राप्तः। तस्य ब्राह्मणस्य तस्याः च अन्योन्यम् परस्परम् अनुरागः प्रेमभावः सञ्जातः। उक्तम् च – **प्रीतिः स्याद्दर्शनाद्यैः......सन्निरस्तान्यधन्वी** इति॥ (५)

अन्वयः

सम्यक् निरस्तान्यधन्वी सन् सः मदनः कामदेवः जयति यत्पुष्पबाणैः प्रथमं दर्शनाद् यैः प्रीतिः स्यात् अथ अनन्तरम् मनःसङ्कल्पभावः, निद्राच्छेदः, वपुषि तनुत्वं, इन्द्रियाणां च कलुषता, निवृत्तिः, ह्रीनाशोन्मादमूर्च्छामरणम् इति एताः दश अवस्थाः जगत् याति इति (५)॥

अन्वयार्थः

सम्यक् निरस्ताः पराजिताः अन्ये धन्विनः धनुर्धारिणः येन सः मदनः कामदेवः जयति सर्वोत्कर्षेण वर्तते, यस्य लग्नैः पुष्पबाणैः पुष्पशरैः प्रथमं दर्शनाद् यैः प्रियदर्शनादिभिः प्रीतिः प्रियविषयकानुरागः स्यात् अथ अनन्तरम् क्रमेण मनसि सङ्गस्य सङ्गतेः सङ्कल्पभावः, ततः निद्राच्छेदः निद्राभङ्गः, वपुषि शरीरे तनुत्वं दौर्बल्यम्, इन्द्रियाणां च कलुषता अर्थात् स्वस्वव्यापारेषु आलस्यम्, निवृत्तिः प्रियादतिरिक्तविषयेषु मनसो विरक्तिः, ह्रीनाशः लज्जायाः अभावः, उन्मादः, मूर्च्छा, मरणम् इति एताः दश अवस्थाः जगत् याति - सर्वे मर्त्याः पूर्वोक्ताः दश अवस्थाः प्राप्नुवन्ति (५)॥

सरलार्थः

सा कदाचित् सर्वगुणोपेता सर्वोत्सववहिःकृता निर्धनं तं महामूर्खं गोविन्दम् पतिम् अब्रवीत् यत् बहुदिनेभ्यः प्राक् पितृगृहाद् आगता। तस्माद् सा तेन सहैव स्वपितुः सकाशं गन्तुम् इच्छति। तदा पत्न्याः वाक्यं श्रुत्वा सः गोविन्दः एकं शकटं नीत्वा तस्याः पितृगृहं प्रति गन्तुम् आरब्धवान्। तत्र पथि एकेन

ब्राह्मणेन सह तयोः मेलनम् अभवत्। सः विद्वान् रूपसम्पन्नः वीरश्चासीत्। तस्य नाम आसीत् विष्णुः इति। गमनसमये तेन विष्णुना सह तस्याः विषकन्यायाः अनुरागः अभवत्। अत्र श्लोके कामस्य दश दशाः वर्णिताः। यदा कोऽपि कस्याः कापि कस्य वा दर्शनेन कामबाणाघातं प्राप्नोति तदा तस्य तस्याः वा एताः दश दशाः भवन्ति। अत्र उच्यते यत् कामदेवः धनुर्धारिणां मध्ये श्रेष्ठः, यतो हि तस्य समक्षं कोऽपि स्वकामं स्ववशे स्थापयितुं न शक्नोति। अपि च तस्य पुष्पबाणेन आदौ प्रियदर्शनादिः अनुरागः उत्पद्यते, परं प्रियया सह मेलनस्य अभिलाष, निद्राभङ्गः, शारीरिकदौर्बल्यम्, इन्द्रियाणां कलुषता अर्थात् स्वस्वव्यापारेषु आलस्यम्, प्रियातिरिक्तविषयेषु मनसो विरक्तिः, लज्जायाः अभावः, उन्मत्तता, मूर्छा, मरणम् इत्येताः कामस्य दश दशाः।

व्याकरणविमर्शः

- अन्यदा - अन्यस्मिन् कस्मिंश्चित् दिने
- शकटम् - वाहनविशेषः (बैलगाडी, छकडा इति लोके)।
- वाग्मी - प्रशस्ता वाक् अस्य इति (वाच् ग्मिनि) वक्ता, वाक्पटुः।

६.२.३) द्वितीयकथा- विषाङ्गनावृत्तम् - मूलपाठः - विभागः - ३

स पथिको दम्पत्योः पूगपत्रोच्चयं ददाति। इत्येवं ग्राम्यब्राह्मणो विष्णोर्विश्वस्तः आत्मनो निरोधसङ्गभयादुत्तीर्य तं गन्त्रीवाहमारोहयति। विष्णुना च पत्यौ वृक्षान्तरगते सा मोहिनी भुक्ता आत्मवशीकृता। तया चात्मीयं नाम गोत्रं कुलक्रमं चाज्ञापितः। पत्युश्च समागतस्य "त्वं चोरोऽसीति" गन्त्रारोहमं कुर्वतो निषेधः कृतः। विष्णुरपि तां गृहीत्वा गोविन्दं धर्षितवान्। ततस्तयोः केशाकेशि संवृत्तम्। गोविन्दस्तु विष्णुना विषकन्याप्रभावेण निर्जितः। ततस्तां गृहीत्वा विष्णुः स्वगृहं प्रतिचलितः। गोविन्दः पृष्ठस्थो मार्गासन्ने ग्रामे गत्वा फूत्कृतवान्-"अनेन चौरेण मम भार्या गृहीता। त्रायतां ताम्। मम शरणं भो जनाः"।

अथ ग्रामाधिपेन विष्णुर्मोहिनीयुतो धृतः। पृष्ठेनोत्तरं दत्तं विष्णुना यथेयं मया परिणीता। मदीयां च भार्यामेष पथिको मार्गे दृष्ट्वा ग्रहिलो बभूव। गोविन्देनापि पृष्ठेन इदमेवोत्तरितम्। ततो मन्त्री तयोरेकमेवोत्तरं श्रुत्वा जात्यादिकं पृष्ठवान्। त्रयमपि तु संवदति ततः कथं निश्चयः। इति शुकप्रश्नः।

व्याख्या

स पथिकः दम्पत्योः पूगपत्रोच्चयम् पूगफलं ताम्बूलपत्रम् च ददाति। इत्येवम् ग्राम्यब्राह्मणः मूर्खब्राह्मणः विष्णोः उपरि विश्वस्तः सन् आत्मनः स्वस्य निरोधसङ्गभयात् निरोधः अवरोधः भार्या इत्यर्थः तस्मिन् सङ्गः अनुरागातिशयः तस्मात् भयम् तस्मात् इति निरोधभङ्गभयात् उत्तीर्य अवतरणं कृत्वा तम् विष्णुम् गन्त्रीवाहम् आरोहयति। विष्णुना च पत्यौ वृक्षान्तरगते सा मोहिनी भुक्ता आत्मवशीकृता स्वायत्तीकृता। विष्णुना तस्याः सम्भोगः कृतः इति भावः। तया मोहिन्या च आत्मीयं स्वकीयम् नाम गोत्रम् कुलक्रमम् च आज्ञापितः। पत्युः च समागतस्य त्वम् चोरोऽसि इति गन्त्र्यारोहणम्

वाहनारोहणम् कुर्वतः कुर्वाणस्य गोविन्दस्य निषेधः कृतः विहितः मोहिन्या इति शेषः। विष्णुः अपि ताम् गृहीत्वा आदाय गोविन्दम् धर्षितवान् आक्रम्य गोविन्दस्य अवमानम् कृतवान्। ततः अनन्तरम् तयोः मध्ये केशाकेशि संवृत्तम् केशेषु केशेषु गृहीत्वा युद्धम् प्रवृत्तम् इति भावः। गोविन्दस्तु विष्णुना विषकन्याप्रभावेण विषकन्यायाः प्रभावः तेन निर्जितः पराजितः। ततः ताम् गृहीत्वा विष्णुः स्वगृहम् प्रतिचलितः।

गोविन्दः पृष्ठस्थः पश्चात् गच्छन् मार्गासन्ने मार्गसमीपवर्तिनि ग्रामे गत्वा फूत्कृतवान् चित्कारम् कृतवान् यत् अनेन विष्णुना चौरेण मम भार्या पत्नी गृहीता स्वीकृता। त्रायताम् रक्षतु ताम् मोहिनीम्। मम शरणम् भो जनाः। हे जनाः भवन्तः एव मे शरणम् इति भावः।

अथ अनन्तरम् ग्रामाधिपेन ग्रामप्रमुखेन विष्णुः मोहिनीयुतः मोहिनीयुक्तः धृतः गृहीतः। तेन पृष्टेन जिज्ञासितेन उत्तरम् दत्तम् विष्णुना यथा इयम् मोहिनी मया परिणीता विवाहिता। मदीयाम् च भार्याम् पत्नीम् एषः पथिकः मार्गे दृष्ट्वा ग्रहिलः ग्रहीतुम् इच्छुः बभूव भवति स्म। गोविन्देनापि पृष्टेन इदम् एव उत्तरितम्। ततः मन्त्री तयोः एकम् एव उत्तरम् श्रुत्वा जात्यादिकम् पृष्टवान्। त्रयम् अपि तु संवदति सम्यक् वदति ततः तेन कथम् निश्चयः स्यात्। इति शुकप्रश्नः।

सरलार्थः

सोऽपि विष्णुः ताभ्यां ताम्बुलादिकं ददाति स्म। सः ग्राम्यब्राह्मणः गोविन्दः तस्य वचनेन विश्वस्तः अभवत्। सः तं विष्णुं शकटस्य चालकरूपेण स्थापितवान्। ततः परं यदा गोविन्दः अन्यं वृक्षं प्रति गतवान् तदा तेन विष्णुना सा विषकन्या वशीकृता। सा अपि स्वस्याः नाम कुलादिपरिचयञ्च तस्मै उक्तवान्। ततः परं यदा गोविन्दः तत्र आगतवान् तदा सः चौरः इति गोविन्दं प्रति विष्णुः उक्तवान्, तस्य अवमानम् च कृतवान्। परं तयोः मध्ये विवादः संवृत्तः। किन्तु विषकन्याप्रभावेण विष्णुः जितवान्। ततः परं विष्णुः तां स्वीकृत्य स्वगृहं प्रति गन्तुम् आरब्धवान्।

गोविन्दः समीपस्थं ग्रामं गत्वा उक्तवान् यत् चौरेण तस्य पत्नी गृहीता। तस्याः रक्षणं कुरु इति। तदा ग्रामाधिपः मोहिनीसमेतं विष्णुं गृहीतवान्। ततः परं विष्णुः उक्तवान् यत् - मम भार्याम् एषः आगत्य बलात् मम सकाशात् गृहीतवान्। गोविन्दः अपि उक्तवान् यत् तस्य सहधर्मिनीं स्वीकृत्य सः गन्तुम् उद्यतः इति। तदा अस्याः समस्यायाः समाधानाय मन्त्री आहूतः। मन्त्री यदा जात्यादिकं पृष्टवान् तदा ते सत्यमेव उक्तवन्तः। तदा समाधानं केन प्रकारेण भवेत् इति शुकस्य प्रश्नः आसीत्।

व्याकरणविमर्शः

- दम्पत्योः - जाया च पतिश्च इति दम्पती तयोः।
- पूगपत्रोच्चयम् - पूगम् पूगफलम् पत्रम् ताम्बूलपत्रम् तयोः उच्चयः अतिशयः तम्।
- निरोघसङ्गभयात् - निरोधः अवरोधः भार्या इत्यर्थे तस्मिन् सङ्गः अनुरागातिशयः आसक्तिः वा तस्मात् भयम् तस्मात्। अयम् भावः- अयं पदातिः विष्णुर्नाम सद्ब्राह्मणः गन्त्रीम् आरूढं मां दृष्ट्वा 'भार्यायाम् अस्य अनुरागातिशयः' इति चिन्तयेत् इति भयात्।
- गोविन्दम् - धर्षितवान् आक्रम्य गोविन्दस्य अवमानं कृतवाान्।
- केशाकेशि - केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति।

➢ ग्रहिलः - जिघृक्षुः।

६.२.४) द्वितीयकथा- विषाङ्गनावृत्तम् - मूलपाठः - विभागः - ४

ततस्तया पृष्टः शुकः आह- मन्त्रिणोक्तम्- "कियन्ति दिनानि सङ्गमस्य युष्माकं प्रयाणे"। तैरुक्तम्- "कल्ये भोजनानन्तरं संवृत्तः समागमः"। ततो मन्त्रिणा ब्राह्मणौ पृथक्पृथक्पृष्टौ- "किमनया कल्ये भोजनवेलायां भुक्तम् "। यच्च तया भुक्तं तद्गोविन्दो जानाति इतरस्तु न। ततः स विडम्बितः सचिवेन। गोविन्दः शिक्षितः। धिगिमां ब्राह्मणीं परत्रेह च दुःखदां मुञ्च शीघ्रम्। उक्तञ्च-

वैद्यं पानरतं नटं कुपठितं मूर्खं परिव्राजकम्।
योधं कापुरुषं विटं विवयसं स्वाध्यायहीनं द्विजम्॥
राज्यं बालनरेन्द्रमन्त्रिरहितं मित्रं छलान्वेषि च।
भार्या यौवनगर्वितां पररतां मुञ्चन्ति ये पण्डिताः॥६॥
तथापि कामिनीलुब्धो धिक्कृतः साधुभिस्तदा।
तामेवादाय चलितस्तत्कृते निहतः पथि॥७॥
तद्देवि यः करोत्येवमवज्ञां वृद्धशिक्षितः।
स पराभवमाप्नोति गोविन्दो ब्राह्मणो यथा॥८॥

इति कथां श्रुत्वा प्रभावती सुप्ता।।

व्याख्या

ततः तया पृष्टः शुकः आह उक्तवान् मन्त्रिणोक्तम् मन्त्रिणा उक्तम् - कियन्ति दिनानि सङ्गमस्य युष्माकं प्रयाणे। भवताम् यात्रा कदा आरब्धा इति भावः। तैः सर्वैः उक्तम् - कल्ये प्रभातसमये भोजनानन्तरं भोजनात् अनन्तरम् परम् संवृत्तः समागमः। ततः मन्त्रिणा ब्राह्मणौ पृथक् पृथक् पृष्टौ - किम् अनया मोहिन्या कल्ये प्रभातसमये भोजनवेलायां भोजनकाले भुक्तम् खादितम्। यच्च तया भुक्तं तद्गोविन्दो जानाति इतरस्तु न। ततः स विडम्बितः तिरस्कृतः सचिवेन। गोविन्दः शिक्षितः उपदिष्टः। धिक् इमां ब्राह्मणीं परत्र परस्मिन् लोके इह अस्मिन् लोके च दुःखदां मुञ्च त्यज शीघ्रम्। उक्तञ्च -

वैद्यं पानरतं नटं कुपठितं मूर्खं परिव्राजकम्।
योधं कापुरुषं विटं विवयसं स्वाध्यायहीनं द्विजम्॥
राज्यं बालनरेन्द्रमन्त्रिरहितं मित्रं छलान्वेषि च।
भार्या यौवनगर्वितां पररतां मुञ्चन्ति ये पण्डिताः॥६॥

अन्वयः

ये पण्डिताः ते पानगतं वैद्यं कुपठितम् नटं मूर्खं परिव्राजकं कापुरुषं योधं विवयसं वृद्धं विटं स्वाध्यायहीनम् द्विजं बालनरेन्द्रमन्त्रिरहितं राज्यं छलान्वेषि मित्रं यौवनगर्विताम् पररतां भार्यां पत्नीं च मुञ्चन्ति। (६)॥

अन्वयार्थः

ये पण्डिताः बुद्धिमन्तः ते पानगतं मद्यपं वैद्यं कुत्सितं पठितं कथोपकथनं यस्य तं नटं नाटकस्याभिनयपात्रं, मूर्खं परिव्राजकं संन्यासिनं कापुरुषं भीरुं योधं योद्धारम्, विगतं वयः यस्य तं विवयसं वृद्धं विटं वेश्यारतं पुरुषं, स्वाध्यायः वेदाध्ययनं तेन हीनं द्विजं विप्रं, बालः नरेन्द्रः भूपः यस्य तत् मन्त्रिभिः रहितं विहीनं राज्यं, छलम् अन्वेष्टुं शीलम् अस्य इति छलान्वेषि कपटव्यवहारि मित्रं, यौवनेन गर्विताम् यौवनोन्मादशालिनीं पररतां परपुरुषेषु आसक्तां भार्यां पत्नीं च मुञ्चन्ति परित्यजन्ति (६)॥

तात्पर्यार्थः

श्लोकेऽस्मिन् पण्डिताः कान् परित्यजन्ति इत्युच्यते। ते च पण्डिताः - मद्यपायिनम् चिकित्सकम्, कुपठितम् नटम्, मूर्खम् सन्यासिनम्, भीरुम् योद्धारम्, वेश्यालयं गच्छन्तम् वृद्धम्, स्वाध्यायरहितम् ब्राह्मणम्, बालकनृपवत् (यस्मिन् राज्ये नृपः बालकः) मन्त्रिशून्यम् च राज्यम्, कपटव्यवहारिणम् बन्धुम्, यौवनगर्विताम् परपुरुषेषु गच्छन्तीम् च परित्यजन्ति इति भावः।

तथापि कामिनीलुब्धो धिक्कृतः साधुभिस्तदा।
तामेवादाय चलितस्तत्कृते निहतः पथि॥७॥

अन्वयः

तथापि तदा कामिनीलुब्धः साधुभिः धिक्कृतः तामेव आदाय चलितः पथि तत्कृते निहतः। (७)॥

अन्वयार्थः

तथापि सचिवेन शिक्षितोऽपि तदा सः कामिन्यां लुब्धः, साधुभिः सद्भिः धिक्कृतः गोविन्दः तामेव मोहिनीम् आदाय गृहीत्वा चलितः प्रस्थितः पथि मार्गे तस्याः कृते निहतः अभवत्। (७)॥

तात्पर्यार्थः

कामिन्याम् प्रलुब्धः गोविन्दः सचिवादिभिः उपदिष्टः। किञ्च साधुभिः तिरस्कृतः। तथापि कामवशात् ताम् एव स्वीकृत्य गतः। अन्ते च मार्गे तस्य नाशः जातः। (७)॥

तद्देवि यः करोत्येवमवज्ञां वृद्धशिक्षितः।
स पराभवमाप्नोति गोविन्दो ब्राह्मणो यथा॥८॥

अन्वयः

तत् हे देवि वृद्धशिक्षितः यः एवम् अवज्ञां करोति सः गोविन्दः ब्राह्मणः यथा पराभवं आप्नोति। (८)॥

अन्वयार्थः

तत् तस्मात् हे देवि वृद्धशिक्षितः वृद्धैः गुरुजनैः शिक्षितः उपदिष्टः यः एवम् इत्थम् अवज्ञाम् अवमानम् करोति उपदेशम् अनुसृत्य न कार्यं करोति सः गोविन्दः ब्राह्मणः इव पराभवं नाशं गच्छति। (८)॥

तात्पर्यार्थः

किम् कर्तव्यम् किम् अकर्तव्यम् इति गुरुजनैः बोधितेऽपि यः न शृणोति तस्य गोविन्दब्राह्मणवत् नाशो भवति। (८)॥

सरलार्थः

इति पृष्टे सः शुकः अवदत् यत् - तदा मन्त्री उक्तवान् - भवन्तः कति दिनानि व्याप्य साकल्येन गच्छन्तः आसन् इति। तदा ते उक्तवन्तः यत् - प्रातः भोजनान्ते समागमः अभवत्। ततः परं मन्त्री गोविन्दं विष्णुं च पृथक्तया पृष्टवान् - सा मोहिनी प्रातः किं भुक्तवती। गोविन्दः जानाति स्म सा किं खादितवान्। सः सत्यम् उक्तवान्। विष्णुः मिथ्या उक्तवान्। तदा मन्त्री तं विष्णुं दण्डितवान् तस्याः विषकन्यायाः च तिरस्कारं कृतवान्। अत्र श्लोके पण्डिताः कान् विषयान् कान् जनान् च परित्यजन्ति इत्यस्मिन् विषये उक्तम्।

यः वैद्यः मद्यपानं करोति तं पण्डिताः त्यजन्ति। यः नटः सम्यक्तया कथोपकथनं न करोति, कुत्सितं भाषते तं पण्डिताः त्यजन्ति। यः सन्न्यासी मूर्खः, यः योद्धा कापुरुषः, यः पुरुषः वृद्धः किन्तु वेश्यागृहं गच्छति अर्थात् यस्य वृद्धत्वे सत्यपि कामशान्तिः न जाता, यो द्विजः वेदादिस्वाध्यायं न करोति, यस्मिन् राज्ये बालकः राजा किञ्च मन्त्री नास्ति तादृशं राज्यम्, यः सखा स्वार्थं सर्वदा पश्यति किञ्च कपटस्वभावसम्पन्नः, या भार्या यौवनोन्मत्ता स्वस्वामिनम् अवज्ञाय परपुरुषं प्रति गच्छति च इत्येतान् पण्डिताः त्यजन्ति। अनेन श्लोकेन इयं शिक्षा प्राप्यते यत् एतैः साकं कदापि बन्धुत्वं न कर्तव्यम् इति इमां कथां श्रुत्वा प्रभावती सुप्ता शयनं कृतवती।

व्याकरणविमर्शः

- कल्ये - प्रभातसमये।
- विडम्बितः - अवमानितः।
- शिक्षितः - उपदिष्टः।

पाठगतप्रश्नाः - २

१७. विषकन्यायाः द्विजस्थानस्य नाम किम्।

१८. विषकन्यायाः पितुः नाम किम्।

१९. सोमशर्मणः कन्यायाः नाम किम्।

२०. विषकन्यायाः पत्युः निवासः क्व।

२१. मोहिन्याः पत्युः नाम किम्।

२२. दानशीलस्य किं दुःखदायकम्।

२३. मूर्खस्य पत्युः कीदृशी पत्नी दुःखदायिका।

२४. शूरस्य ब्राह्मणस्य नाम किम्।

२५. विष्णुः ताभ्यां किं दत्तवान्।

२६. कदा तेषां समागमः अभवत्।

२७. .... अपि हितं वाक्यं ग्राह्यम्।

२८. पतितः .... अनर्थे विषकन्याविवाहने।

२९. सोमशर्मायाः वासस्थानस्य नाम – (ब्रह्मस्थलम् / जनस्थानम् / जनपुरम् / सोमप्रभम्)

३०. गोविन्दस्य किं नासीत् - (मूर्खता / निर्बुद्धिता / विद्वत्ता / उपस्थिता बुद्धिः)

३१. विषकन्या किम् आधारीकृत्य शुशोच (विद्याबलम् / पितुः धनसम्पत्तिम् / दाम्भिकत्वम् / आत्मनः रूपलावण्ययौवनम्)

३२. .... पतिः स्त्रीणाम् (सुरूपः / अविदग्धः / विनम्रः / चतुरः)

३३. गुणिनां त्यागिनां .... विभवश्चेति दुःखकृत्।

६.३) तृतीयकथा - बुद्धिः सर्वत्र ज्येयसी

प्रस्तावना

बुद्धिर्यस्य बलं तस्य, निर्बुद्धेस्तु कुतो बलम्। अर्थात् यस्य बुद्धिः वर्तते सः अत्यन्तसङ्कटात् अपि आत्मानं रक्षयितुं शक्नोति। तस्मात् यः बुद्धिमान् स एव बलवान्। यस्य बुद्धिः नास्ति सः एव वास्तवेन दुर्बलः। अत्र प्रसङ्गे शुकसप्ततिः इत्याख्ये ग्रन्थे प्रभावतेः पतिः वाणिज्यार्थं दूरदेशं गतः। तदा तां कथामुखेन तस्याः कालयापनाय शुकः कथां श्रावयति स्म। बुद्धिमती स्त्री केन प्रकारेण आत्मनं रक्षितवती इति कथयितुं शुकः इमां कथां अश्रावयत्।

६.३.१) तृतीयकथा- बुद्धिः सर्वत्र ज्येयसी - मूलपाठः - विभागः - १

हसन्नाह शुको याहि यदि कर्तुं त्वमुत्तरम्।
वेत्सि यथा श्रियादेव्या नूपुरेऽपहृते कृतम्॥१॥

अन्वयः

शुकः हसन् आह नूपुरे अपहृते यथा श्रियादेव्या कृतम् (तथैव) त्वम् उत्तरम् कर्तुम् यदि वेत्सि (तर्हि) याहि। (१)॥

अन्वयार्थः

शुकः हसन् वदति यथा नूपुरे अपहृते परपुरुषसङ्गतिकाले सुप्तायाः तस्याः श्वशुरेण नूपुरे अपहृते सति श्रियादेव्या कृतम् (तथैव) त्वम् उत्तरं प्रतिकारम् कर्तुं विधातुम् यदि वेत्सि जानासि (तर्हि) याहि। (१)॥

सरलार्थः

वणिक् यदा देशान्तरं वाणिज्यार्थम् अगमत् तदा तस्य पत्नी प्रभावती एकाकिनी आसीत्। तदा आसीत् वसन्तकालः। तस्मात् रमणसुखं प्राप्तुं तस्याः इच्छा सञ्जाता। तत् शमयितुं शुकः अवदत् यत् श्रियादेवी यथा परपुरुषसङ्गं कृत्वापि स्वबुद्धिबलेन आत्मानं रक्षितवती तथा यदि त्वम् (प्रभावती) अपि कर्तुं शक्नोषि तर्हि परपुरुषम् गन्तुम् अर्हसि इति। ततः परं सः शुकः कथाम् आरब्धवान्।

६.३.२) तृतीयकथा- बुद्धिः सर्वत्र ज्येयसी - मूलपाठः - विभागः - २

अस्ति शालिपुरं नाम नगरम्। तत्र शालिगो वणिक्। तत्पत्नी जयिका। तयोः सुतो गुणाकरो नामाभूत्। तद्भार्या श्रियादेवी। सा चापरेण सुबुद्धिनाम्ना वणिजा सह रमते। ततो लोकापवादेऽपि संजातेऽनुरक्तस्तदीयः पतिर्न किमपि कर्णे करोति। उक्तञ्च

रक्ताः पृच्छन्ति गुणान् दोषान् पृच्छन्ति ये विरक्ताः।
मध्यस्थाः पुनः पुरुषा दोषानपि गुणानपि पृच्छन्ति॥२॥

किञ्च

महिलारक्ताः पुरुषाश्छेका अपि न सम्भरन्ति आत्मानम्।
इतरे पुनस्तरुणीनां पुरुषाः सलिलमेव हस्तगतम्॥३॥

व्याख्या

शालिपुरं नाम नगरं प्रदेशः अस्ति वर्तते। तत्र शालिगः इत्यभिधः वणिक् वैश्यः तिष्ठति। तस्य पत्नी भार्या जयिका। तयोः सुतः पुत्रः गुणाकरः इति नामकः। तस्य पत्नी श्रियादेवी। सा अपरेण अन्येन सुबुद्धिनाम्ना वणिजा वैश्येन सह रमते तिष्ठति। ततः लोकापवादे लोकनिन्दासत्वे अपि, अनुरक्तः श्रियादेव्यां आसक्तः, तदीयः तस्याः पतिः भर्ता, न किमपि कर्णे करोति - न शृणोति - लोकापवादे न विश्वसिति इत्यर्थः।

रक्ताः पृच्छन्ति गुणान् दोषान् पृच्छन्ति ये विरक्ताः।
मध्यस्थाः पुनः पुरुषा दोषानपि गुणानपि पृच्छन्ति॥२॥

अन्वयः

रक्ताः गुणान् पृच्छन्ति विरक्ताः दोषान् पृच्छन्ति। मध्यस्थाः पुरुषाः पुनः गुणान् अपि दोषान् अपि पृच्छन्ति। (२)॥

अन्वयार्थः

रक्ताः इति- रक्ताः प्रीतिमन्तः गुणान् पृच्छन्ति वाञ्छन्ति इत्यर्थः - तेषां गुणैरेव प्रयोजनम्। विरक्ताः प्रीतिरहिताः दोषान् पृच्छन्ति, तेषां दोषैरेव प्रयोजनम्। मध्यस्थाः पुरुषाः गुणान् दोषान् चापि पृच्छन्ति, तेषां गुणैः दोषैरपि च प्रयोजनम्। (२)॥

तात्पर्यार्थः

ये तावत् प्रीतिमन्तः जनाः सन्ति ते गुणान् इच्छन्ति। प्रीतिरहिताः जनाः दोषान् एव वाञ्छन्ति। मध्यस्थैः पुरुषैः तु उभयमपि इष्यते। (२)॥

महिलारक्ताः पुरुषाश्छेका अपि न सम्भरन्ति आत्मानम्।
इतरे पुनस्तरुणीनां पुरुषाः सलिलमेव हस्तगतम्॥३॥

अन्वयः

महिलारक्ताः छेकाः पुरुषाः अपि न आत्मानं संभरन्ति। पुनः इतरे पुरुषाः तरुणीनां हस्तगतं सलिलमेव। (३)॥

अन्वयार्थः

महिलासु स्त्रीषु रक्ताः अनुरागशालिनः छेकाः नागरिकाः निपुणाः इत्यर्थः अपि न आत्मानं संभरन्ति अधिकुर्वन्ति, आत्मनः उपरि तेषाम् अधिकारो न भवति अपि तु स्त्रीणामेवेति भावः। इतरे पुनः पुरुषाः तरुणीनां स्त्रीणां हस्तगतं जलमेव, यथा हस्तगतं जलं शनैः शनैः स्रवन् अञ्जलेः दूरं याति तथैव ते पुरुषाः स्त्रीणाम् हस्तेषु न तिष्ठन्ति अपि तु स्वाधीनाः भवन्तीति भावः। (३)॥

तात्पर्यार्थः

पुरुषेषु केचित् महिलासु रक्ताः भवन्ति तेषाम् आत्मनः उपरि अधिकारो नास्ति। पुनः अपरे केचित् पुरुषाः सन्ति ये तावत् स्त्रीणाम् हस्तेषु न तिष्ठन्ति अपितु स्वाधीनाः भवन्तीति भावः। (३)॥

सरलार्थः

पुरा शालिपुरं नाम एकं नगरम् आसीत्। तत्र एकः वणिक् निवसति स्म। तस्य नाम आसीत् शालिगः इति। तस्य पत्न्याः नाम आसीत् जयिका इति। तस्य पुत्रस्य नाम आसीत् गुणाकरः इति, पुत्रवध्वाः च श्रियादेवी इति। सा श्रियादेवी सुबुद्धिः इति नामके अन्ये पुरुषे आसक्ता आसीत्। सर्वे अमूं वृत्तान्तं कथयन्ति स्म। परन्तु गुणाकरः स्वस्य पत्नीम् अत्यन्तं प्रीणाति स्म। तस्मात् लोकानां वार्ता कामपि न शृणोति स्म। एवं कथयन्ति विद्वांसः उच्यते यत् रक्ताः प्रीतिमन्तः, गुणान् पृच्छन्ति गुणान् एव गृह्णन्ति, विरक्ताः प्रीतिरहिताः, दोषान् पृच्छन्ति दोषाणाम् आविष्कारं कुर्वन्ति, मध्यस्थाः प्रीतिद्वेषरहिताः, पुरुषाः जनाः, दोषानपि गुणानपि सर्वविधं यथायथं पृच्छन्ति गृह्णन्ति।

६.३.३) तृतीयकथा- बुद्धिः सर्वत्र ज्येयसी- मूलपाठः- विभागः- ३

अन्यदा सा श्वशुरेण नरान्तरसहिता सुप्ता दृष्टा। ततश्चरणान्नूपुरं श्वशुरेण चोत्तारितं तया च ज्ञातम्। ततः सा तं जारं प्रस्थाप्य भर्तारं तत्रानीय तेन सह सुप्ता। निद्रान्तरे च पतिरुत्थापितः

कथितञ्च - त्वदीयेन पित्रा नूपुरमस्मत् पादाद् अवतार्य गृहीतम्। एवंविधं च पातकं क्वापि न दृष्टं यद्वधूपादात् श्वशुरो नूपुरं गृह्णाति। तेनोक्तं - प्रातः पितुः सकाशात् स्वयमर्पयिष्यामि। तेन च गुणाकरेण पितरं निर्भर्त्स्य तत्सकाशान्नूपुरं याचितम्। पित्रा चोक्तं यदियं परपुरुषेण सह सुप्ता दृष्टा अतो मया नूपुरं गृहीतम्।

व्याख्या

अन्यदा अन्यस्मिन् दिवसे, सा श्रियादेवी, श्वशुरेण स्वस्याः पत्युः पित्रा, सह सुप्ता दृष्टा शयनयुक्ता अवलोकिता। ततः चरणात् नूपुरं श्वशुरेण आर्येण, चोत्तारितं स्वीकृतम् इति तया श्रियादेव्या ज्ञातम् अवलोकितम्। ततः सा जारं परपुरुषं प्रस्थाप्य सम्प्रेष्य, भर्तारं पतिं तत्र आनीय, तेन सह सुप्ता तस्य पार्श्वे सुप्तवती। निद्रान्ते निद्रायाः अवसाने, तया पत्न्या, पतिः भर्ता उत्थापितः जागरितः, कथितञ्च उक्तश्च, त्वदीयेन तव, पित्रा जनकेन अस्मत्पादात् मम पादात् नूपुरं गृहीतं स्वीकृतम्। एवंविधम् इत्थं पातकं पापकर्म क्वापि कुत्रापि, न दृष्टं नावलोकितम्, यत् वधूपादात् पुत्रवध्वाः चरणात् श्वशूरः भर्तुः पिता, नूपुरं गृह्णाति स्वीकरोति। तेनोक्तं प्रातः पितुः सकाशात् स्वयम् अर्पयिष्यामि कथयिष्यामि। तेन गुणाकरेण पितरं निर्भर्त्स्य भर्त्सनां कृत्वा तत्सकाशात् नूपुरं याचितं प्रार्थितम्। पित्रा उक्तम् यत् इयं श्रियादेवी, परपुरुषेण सह सुप्ता दृष्टा, अतः तस्मात् मया नूपुरं गृहीतं स्वीकृतम्।

सरलार्थः

एकस्मिन् दिवसे सा श्रियादेवी तेन सुबुद्धिना परपुरुषेण सह शयनं करोति। तदा तस्याः श्वशुरः तां तथाभूतं दृष्टवान्। सः श्वशूरः तस्याः पादात् नूपुरं स्वीकृतवान् स्वपुत्रं प्रति कथयितुम्। श्रियादेवी एतत् सर्वं ज्ञातवती। सा सुबुद्धिं अन्यत्र प्रेषयित्वा तत्र स्वस्याः पतिम् आनीय शयनं कृतवती। निद्रायाः अन्ते सा तं पतिम् अकथयत् यत् तस्याः श्वशुरः पादात् नूपुरं स्वीकृतवान् एतादृशं पापकार्यं सा कदापि न दृष्टवती इति। तदा पतिः उक्तवान् यत् सः प्रातः पितरं वदिष्यति इति। ततः परस्मिन् प्रातः सः पितरं भर्त्सयित्वा तस्य सकाशात् नूपुरं याचितवान्। तदा तस्य पिता उक्तवान् यत् सः रात्रौ तां श्रियादेवीं अन्येन पुरुषेण सह शयनं कुर्वन्तीं दृष्टवान्। तस्मात् तस्याः पादात् नूपुरं स्वीकृतवान् इति।

व्याकरणविमर्शः

- उत्तारितम् - गृहीतम्।
- प्रस्थाप्य - सम्प्रेष्य।

६.३.४) तृतीयकथा- बुद्धिः सर्वत्र ज्येयसी- मूलपाठः- विभागः- ४

तयोक्तम् - त्वत्पुत्रेण सह सुप्ताहमासम्। इत्यर्थे दिव्यं करोमि। अत्रैव ग्रामे उत्तरस्यां दिशि यक्षोऽस्ति। तस्य जङ्घान्तरान्निर्गमिष्यामि। यः कश्चित्सत्यो भवति स जङ्घयोरन्तरान्निष्क्राम्यतीति प्रसिद्धम्। एवं श्वशुरेण चाङ्गीकृते सा कुलटा सति दिने जारस्य गृहे गत्वा तमुवाच - भो कान्त! प्रातरहं दिव्यार्थं यक्षस्य जङ्घान्तरान्निर्गमिष्यामि। त्वया तत्र समागत्य वातूलत्वमाश्रित्य मम कण्ठग्रहो विधेयः। तेन च तथोक्ते सा स्वगृहमाजगाम।

व्याख्या

तया श्रियादेव्या, उक्तं यत् त्वत्पुत्रेण गुणाकरेण सह अहं सुप्ता शयनरता, आसम्। इत्यर्थे अस्मिन् प्रसङ्गे प्रमाणं दातुं, दिव्यं देवतायाः कार्यं, करोमि प्रमाणरूपेण स्थापयामि। अत्रैव समीपे एव ग्रामे, उत्तरस्यां दिशि उदिच्यां दिग्भागे, यक्षः तथा नामकः देवः, अस्ति तिष्ठति। तस्य जङ्घात् जङ्घप्रदेशात् निर्गमिष्यामि बहिः आगमिष्यामि। यः कश्चित् सत्यः भवति सत्याचरणशाली भवति, सः जङ्घयोः अन्तरात् मध्यस्थानात्, निक्राम्यति इति प्रसिद्धम्। एवं श्वशुरेण अङ्गीकृते स्वीकृते सा कुलटा व्यभिचारिणी, दिने दिवसे, जारस्य परपुरुषस्य सुबुद्धेः, गृहं गत्वा तम् उवाच यत् भो कान्त, प्रिय, प्रातः अहं दिव्यार्थं देवतायाः प्रामाण्यं स्वीकर्तुं, यक्षस्य जङ्घान्तरान्निर्गमिष्यामि बहिः आगमिष्यामि। त्वया तत्र समागत्य उपस्थितः भूत्वा, वातुलत्वम् आश्रित्य उन्मादस्य दशां स्वीकृत्य मम कण्ठग्रहः कण्ठालिङ्गनम्, विधेयः करणीयः इति। तेन च तथोक्ते तथा कथिते सा स्वगृहम् आजगाम आगतवती।

सरलार्थः

स्वस्याः भर्तुः पितुः वाक्यं श्रुत्वा तस्य विरोधं कृत्वा सा कथितवती यत् सा गुणाकरेण सह एव शयनं कृतवती इति। तदा प्रमाणं दातुं सा उक्तवती यत् तस्मिन् ग्रामे एकं यक्षमन्दिरं वर्तते। तत्र यः सत्यं वदति सः तस्य यक्षस्य जङ्घयोः अन्तरात् बहिः आगन्तुं शक्नोति। तथा अहं करिष्यामि इति सा कथितवती। तदा श्वशुरः अपि अङ्गीकृतवान्। ततः परं सा परपुरुषस्य गृहं गत्वा उक्तवती यत् सः प्रातः उन्मादस्य भानं कृत्वा यदा सा मन्दिरं प्रति गमिष्यति तदा तस्याः कण्ठस्य आलिङ्गनं करिष्यति इति। एवं तस्मै सुबुद्धिने उक्त्वा सा स्वकीयगृहम् आगतवती।

व्याकरणविमर्शः

- दिव्यम् - दैवी परीक्षा, यतः पुरा अपराधा सदोषः निर्दोषो वेति निर्णीयते स्म।
- वातूलत्वमाश्रित्य - वातूलः उन्मत्तः तस्य भावं गृहीत्वा।

६.३.५) तृतीयकथा- बुद्धिः सर्वत्र ज्येयसी- मूलपाठः- विभागः- ५

अथ प्रातः समस्तमहाजनं मेलयित्वा पुष्पाक्षतादिकमादय यक्षायतने गत्वा समीपसरसि स्नानं कृत्वा यक्षपूजार्थं समागच्छन्त्यास्तस्याः पूर्वसङ्केतितो जारो ग्रहिलीभूतस्तत्कण्ठे निजबाहुद्वयं योजयामास। तत आः किमेतदित्यभिधाय सा पुनः स्नानार्थं ययौ। सोऽपि ग्रहिलो लोकैः कण्ठे गृहीत्वा तस्मात्प्रदेशाद्दूरीकृतः। सापि स्नानं कृत्वा यक्षसमीपमागत्य पुष्पगन्धाद्यैरभ्यर्च्य सर्वलोकानां शृण्वतामुवाच - भो भगवन्यक्ष! निजभर्तारमेनं च ग्रहिलं विना यदि अन्यपुरुषः स्पृशति कदाचन मां तदा तव जङ्घाभ्यां सकाशान्मम निष्क्रमणं मा भवतु इत्यभिधाय सर्वलोकसमक्षमेव जङ्घयोर्मध्ये प्रविश्य निष्क्रान्ता। यक्षोऽपि तद्बुद्धिं मनसि श्लाघमान एव स्थितः। सापि सतीति समस्तलोकैः पूजिता स्वभवनं जगाम। एवं चेत्श्रियादेवीवत्कर्तुं जानासि तदा व्रज। इति श्रुत्वा प्रभावती सुप्ता।

व्याख्या

अथ प्रातः परस्मिन् दिवसे, समस्तमहाजनं मेलयित्वा सर्वान् जनान् एकत्रीकृत्य, पुष्पाक्षतादिकं आदाय स्वीकृत्य, यक्षायतने गत्वा यक्षमन्दिरं प्रविश्य, समीपसरसि समीपस्थायां पुष्परिण्यां, स्नानं कृत्वा यक्षपूजार्थं समागच्छन्त्याः प्रविशन्त्याः,तस्याः पूर्वसङ्केतितः पूर्वोक्तः जारः परपुरुषः, ग्रहिलीभूत उन्मत्तः भूत्वा, तत्कण्ठे निजबाहुद्वयं हस्तयुगलं, योजयामास योजितवान्। ततः आः किमेतद् इति अभिधाय इत्थम् उक्त्वा, सा पुनः स्नानार्थं ययौ अगच्छत्। सः अपि ग्रहीलः आत्मानम् उन्मत्तं प्रदर्शयन्, लोकैः जनैः कण्ठे गृहीत्वा तस्मात्प्रदेशात् तत्स्थानात् दूरीकृतः दूरम् अपसारितः। सापि स्नानं कृत्वा यक्षसमीपम् आगत्य तस्य निकटम् एत्य, पुष्पगन्धाद्यैः अभ्यर्च्य तस्य आराधनां कृत्वा, सर्वलोकानं शृण्वताम् उवाच सर्वे यथा श्रोतुं शक्नुयुः तथा उक्तवान् यत् भो भगवान् यक्ष, निजभर्तारं गुणाकरम्, एनं ग्रहिलं सुबुद्धिं च विना यद्यन्यपुरुषः अन्यः पुरुषः, मां, स्पृशति स्पर्शं करोति, कदाचन कदापि, तदा तव जङ्घाभ्यां सकाशात् मम निक्रमणं बहिः आगमनम्, मा भवतु नैव स्यात् इति अभिधाय उक्त्वा, सर्वलोकसमक्षम् सर्वेषां जनानां पुरतः, जंघयोः मध्ये प्रविश्य निष्क्रान्ता बहिः आगताः। यक्षः अपि तद्बुद्धिं तस्याः मतिं, मनसि श्लाघमानः प्रशंस्यमानः, एव स्थितः आसीत्। सा अपि सती इति समस्तलोकैः सर्वजनैः पूजिता संस्तुता, स्वभवनं जगाम निजगृहं गतवती। एवं चेत् तथाभूतं यदि कर्तुं, जानासि शक्नोषि तर्हि, व्रज गच्छ। इति श्रुत्वा प्रभावती सुप्ता शयनं कृतवती।

सरलार्थः

परस्मिन् दिवसे प्रातः सर्वान् एकत्रीकृत्य पुष्पादिकं स्वीकृत्य सा यक्षमन्दिरं गतवती। तत्र समीपे स्थितायां पुष्करिण्यां स्नात्वा यक्षस्य पूजनार्थं यदा सा मन्दिरं प्रति गच्छति तदा सः परपुरुषः सुबुद्धिः उन्मादः भूत्वा तस्याः कण्ठं स्वीकृतवान्। तदा किमिदम् इत्युक्त्वा सा पुनः स्नानार्थं गतवती। स्नानं समाप्य मन्दिरं प्रविश्य यक्षदेवतायाः पुष्पधूपादिवस्तुभिः पूर्जाचनां कृतवती। ततः परं सर्वे यथा श्रोतुं शक्नुवन्ति तथा उच्चस्वरेण देवतां प्रति उक्तवती यत् तस्याः पतिः किञ्च कियत्पूर्वं यः उन्मादः - एतौ द्वौ एव तां स्पृष्टवन्तौ। तौ विहाय अन्यः कश्चन यदि तां स्पृष्टवान् तर्हि यक्षस्य जङ्घयोः अन्तरात् तस्य निर्गमनं न भविष्यति इति। ततः परं सर्वेषां पुरतः सा जङ्घयोः मध्ये प्रविश्य बहिः आगता। यक्षः तस्याः बुद्धिं ज्ञात्वा तस्याः मनसि स्तुतिम् अकरोत्। सा श्रियादेवी अपि सती इति उक्त्वा सर्वे तस्याः प्रशंसाम् अकुर्वन्। एवं यदि सा प्रभावती अपि बुद्धिकौशलेन आत्मानं रक्षयितुं समर्था तर्हि सा गन्तुं योग्या। इति कथां श्रुत्वा सा प्रभावती निद्रायां लीनः अभवत्।

व्याकरणविमर्शः

- ग्रहिलीभूतः- भूताविष्टः, आत्मानम् उन्मत्तम् प्रदर्शयन्निव तस्या जारः इत्यर्थः।
- सर्वलोकानां- शृण्वताम्- सर्वान् जनान् श्रावयित्वा इत्यर्थः।
- श्लाघमानः- प्रशंसां कुर्वन्।

टिप्पणी

पाठगतप्रश्नाः-३

३४. नगरस्य नाम किम्।

३५. तत्रस्थस्य वणिजः नाम किम्।

३६. शालिगस्य पत्न्याः नाम किम्।

३७. शालिगस्य सुतः कः।

३८. गुणाकरस्य भार्या का।

३९. सा केन परपुरुषेण सह रमते।

४०. के केवलं गुणान् एव गृह्णन्ति।

४१. गुणान् दोषान् अपि के गृह्णन्ति।

४२. श्वशुरः श्रियादेव्याः सकाशात् किं स्वीकृतवान्।

४३. सत्यतायाः कृते कः प्रमाणीभूतः।

पाठसारः

अस्मिन् पाठे शुकसप्ततिः इत्याख्यकथाग्रन्थात् कथात्रयं स्वीकृता। **प्रथम**कथायाः नाम आसीत् सुदर्शनधीः इति। तस्मिन् पाठे राज्ञः सुदर्शनस्य विचारक्षमताविषये ज्ञायते। विमलनामकः एकः वणिक् आसीत्। तस्य पत्नीद्वयम् आसीत्। तत्रैव ग्रामे एकः धूर्तः आसीत्। सः तस्य पत्नीद्वयं प्राप्तुं देव्याः अम्बिकायाः उपासनां कृत्वा विमलसमानरूपं प्राप्तवान्। ततः परं यदा विमलः गृहात् बहिः गतवान् तदा तस्य गृहं गतवान्। सः सर्वेभ्यः धनादिकं ददाति स्म। तस्मात् सर्वे प्रसन्नाः जाताः। परं यदा सत्यः विमलः आगतवान्, तदा सर्वे तं भिन्नः इति कथितवन्तः। तदा सः राज्ञः समीपं गतवान्। राजा तस्य पत्नीद्वयं रुक्मिणीं सुन्दरीं च पृष्टवान् यत् तयोः पतिः विवाहसमये किम् आभरणं दत्तवान्, वार्तालापसमये किं किम् उक्तवान् च इति। सत्यः विमलः सर्वं सम्यग् उक्तवान्। तदा राजा तं सपत्नीकं आदरेण गृहं प्रेषितवान्। अन्यं धूर्तं च दण्डितवान्।

द्वितीयकथायां कथायां गुरुजनानाम् उपदेशाः सर्वदा श्रवणीयाः इति विषये शुकः उक्तवान्। गोविन्दनामकः ब्राह्मणः आसीत्। सः गुरुजनानां तथा मित्रजनानां च निषेधम् उल्लङ्घ्य मोहिनीनामिकया विषकन्यया सह विवाहं कृतवान्। परम् एकस्मिन् दिवसे यथा तस्याः पितृगृहं प्रति गच्छति तदा मार्गे विष्णुनामकः एकः ब्राह्मणः ताभ्यां सह गन्तुम् आरब्धवान्। सा मोहिना तस्मिन् विष्णौ अनुरक्ता जाता। सः विष्णुः तं गोविन्दं यानात् अवतीर्य तां नीत्वा स्वगृहं प्रति गन्तुम् आरब्धवान्। गोविन्दः ग्रामाधिपतिम् उक्तवान्। सः विष्णुं मोहिनीं च धृतवान्। तदा मन्त्री आगत्य समाधानार्थं गोविन्दं पृष्टवान् यत् मोहिनी प्रातः किं भुक्तवान्। इति। विष्णुः भोजनानन्तरम् आगतवान्, तस्मात् सः सम्यक्तया न जानाति स्म। मन्त्री तस्य कृते दण्डम् उद्घोषितवान्। किञ्च गोविन्दम् उक्तवान् मोहिन्याः परित्यागार्थम्। यतो हि सा स्त्री

स्वस्याः पतिं परित्यज्य अन्येन केनापि सह साग्रहं गच्छति सा पतिव्रता न। तस्मात् तस्याः परित्यागः करणीयः इति उपदेशः।

तृतीयकथायां शुकः उक्तवान् यत् शालिपुरम् - नामके नगरे गुणाकरः नामकः वणिक् आसीत्। तस्य पत्नी श्रियादेवी। सा सुबुद्धिनामके अन्ये पुरुषे रक्ता आसीत्। एकस्मिन् दिवसे सुबुद्धिना सह शयनसमये तस्याः श्वशुरः तां दृष्टवान्। सा परं तस्याः पतिं छलेन उक्तवती यत् श्वशुरः मिथ्यां दृष्टवान्। परस्मिन् दिवसे यदा सर्वे न विश्वसन्ति स्म, तदा सा उक्तवती यत् ग्रामे यत् यक्षमन्दिरम् अस्ति, तत्र यक्षस्य जङ्घयोः मध्यात् आगमिष्यामि इति। यः आगन्तुं शक्नोति सः सत्यवादी इति प्रसिद्धिः तदा आसीत्। ततः परं सा सुबुद्धिम् उक्तवती श्वः मन्दिरगमनात् प्राग् उन्मादः भूत्वा तस्याः कण्ठस्वीकारार्थम्। प्रातः यदा सा स्नानं कृत्वा गच्छति तदा सः तथैव तस्याः कण्ठम् आलिङ्गितवती। परं सा पुनः स्नानं कृत्वा यक्षम् उक्तवान् यत् यदि स्वस्याः पतिं किञ्च उन्मादं विहाय न कश्चित् तं पृष्टवान् तदा सा बहिः आगन्तुं शक्नोति इति। सा बहिः आगतवती, यक्षः अपि तस्याः वचनं श्रुत्वा प्रशंसाम् अकरोत्।

किमधिगतम्

१. राज्ञः सुदर्शनस्य विचारक्षमता।

२. न धर्मवृद्धेषु वयः समीक्ष्यते।

३. बालकादपि हितं वाक्यं ग्राह्यम्।

४. बुद्धिबलेन आत्मनः रक्षणम्।

योग्यताविस्तारः

ग्रन्थविस्तारः

कथया बोधः मोदश्च सममेव सिध्यति। तस्मात् अस्मिन् पाठे याः कथाः प्रदत्ताः एतादृशानां कथानां भूयशः अध्ययनं कर्तव्यम्। अत्रस्थानां कथानां विस्तृतव्याख्यादिकं पठित्वा यदि अध्येतारः अधिकज्ञानं लब्धुम् इच्छन्ति तर्हि ते -

१. पण्डितरमाकान्तत्रिपाठिना व्याख्यातं शुकसप्ततिः इति पुस्तकं पठन्तु।

२. आचार्यगुरुप्रसादशास्त्रिणा विरचितं पञ्चतन्त्रस्य अभिनवराजलक्ष्मीनामिका संस्कृतटीकां पठन्तु।

भावविस्तारः

१. अत्र याः कथाः वर्तन्ते तेषां नाटकं कर्तुं शक्नुवन्ति भवन्तः।

टिप्पणी

२. छात्राणां सारल्येन उपदेशावसरे एताः कथाः वर्णयितुं शक्नुवन्ति।

३. अत्र सुदर्शनराज्ञः किञ्च मन्त्रिणः चरित्रम् अवलोकनीयम्।

४. उपस्थितबुद्धिबलेन कथं रक्षणं भवति इति ज्ञातुं शक्नुवन्ति।

भाषाविस्तारः

१. अत्र ये समासाः वर्तन्ते तेषां तालिकां कुरुत।

२. अत्रत्यानां कठिनपदानाम् अर्थसहितां तालिकां रचयत।

३. ये नवीनशब्दाः ज्ञाताः तेषां लेखनसमये व्यवहारं कुरुत।

पाठान्तप्रश्नाः

१. धूर्तः केन प्रकारेण सर्वान् स्ववशे नीतवान्।

२. राजा कम् उपायम् अवलम्ब्य समाधानं कृतवान्।

३. सुदर्शनधीः इति कथायाः सारं वर्णयत।

४. किं दुःखदायकं त्रयम्, व्याख्यात। अविदग्धः इत्यादि श्लोकार्थः।

५. किं जीवने दुःखं ददाति। अप्रस्तावे इत्यादि श्लोकार्थः।

६. कामस्य काः दश दशाः, वर्णयत। प्रीतिः स्याद्दर्शनाद्यैः इत्यादिश्लोकार्थः।

७. पण्डिताः कान् परित्यजन्ति। वैद्यं पानरतम् इत्यादि श्लोकार्थः।

८. कथं दम्पद्भ्यां साकं विष्णोः मेलनं जातम्, कुतश्च तैः सह विवादः संवृत्तः।

९. मन्त्री कथं तेषां समाधानम् कृतवान्।

१०. विषाङ्गनावृत्तम् इत्यस्य कथासारं वर्णयत।

११. के किं विषयं गृह्णन्ति इति श्लोकम् उक्त्वा वर्णयत।

१२. श्रियादेवी कथम् आत्मानं रक्षितवती।

१३. यक्षदेवता कुतः मनसा तस्याः बुद्धेः प्रशंसां कृतवान्।

१४. बुद्धिः सर्वत्र ज्येयसी इति सूक्तिम् उदाहरणपुरःसरं प्रतिपादयत।

पाठगतप्रश्नोत्तराणि

उत्तराणि-१

१. अनिरुद्धवेगा।

२. प्रभावतीं प्रति।

३. विशाला नगरी।

४. राज्ञः नाम सुदर्शनः इति।

५. वणिजः नाम विमलः इति।

६. रुक्मिणी सुन्दरी च।

७. कुटिलः इति नाम आसीत् धूर्तस्य।

८. देवीम् अम्बिकाम् पूजयित्वा वरं प्राप्तवान्।

९. प्रजापीडनसन्तापात्समुद्भूतः अग्निः राज्ञः कुलं दहति।

१०. स्वर्गप्राप्तिनिमित्तकम्।

११. विशाला।

१२. रुक्मिणी, सुन्दरी।

१३. कुटिलः।

१४. बहुमानदानादिना।

१५. प्रजापीडनसन्तापात्।

१६. स्वर्गप्राप्त्यर्थम्।

उत्तराणि-२

१७. सोमप्रभः इति।

१८. विषकन्यायाः पितुः नाम सोमशर्मा इति।

१९. मोहिनी इति।

२०. जनस्थान इत्याख्ये स्थाने।

२१. गोविन्दः

२२. स्वल्पं धनम्।

२३. कामकलानिपुणा पत्नी।

२४. विष्णुः इति।

२५. ताम्बुलं दत्तवान्।

२६. प्रातः भोजनान्ते।

२७. बालकात्।

२८. ब्राह्मणः।

२९. सोमप्रभम्।

३०. विद्वत्ता।

३१. आत्मनः रूपलावण्ययौवनम्।

३२. अविदग्धः।

३३. स्तोकः।

उत्तराणि-३

३४. शालिपुरम् इति नाम।

३५. शालिगः इति।

३६. जयिका।

३७. गुणाकरः।

३८. श्रियादेवी।

३९. सुबुद्धिना।

४०. रक्ताः।

४१. मध्यस्थाः।

४२. श्रियादेव्याः नूपुरम्।

४३. यक्षः।

॥ इति षष्ठः पाठः ॥